| | | | |
|---|---|---|---|
| **Course Title:** Modern Indian Language 1 | | | |
| **Course code:** AEC 102 | **No. of credits: 3** | **L-T-P:** 33-12-0 | **Learning hours: 45** |
| | | | **L:** Lectures**; T:** Tutorials**; P:** Practicals |
| **Pre-requisite course code and title (if any):** None | | | |
| **Department: Natural and Applied Sciences** | | | |
| **Course coordinator:** | | **Course instructor:** | |
| **Contact details:** | | | |
| **Course type**: Ability Enhancement Course | | **Course offered in:** Semester 2 | |

पाठ्यक्रमविवरणम् -

अयं संस्कृतभाषायाः प्रारम्भिकपाठ्यक्रमो वर्तते। अयं पाठ्यक्रमस्तेभ्यश्छात्रेभ्यो निर्मितो वर्तते ये संस्कृतभाषायाः ज्ञानमवाप्तुं यतन्ते तथा च स्नातकस्तरे आधुनिकभारतीयभाषासु संस्कृतमेकभाषारूपेण चिन्वन्ति। अस्य पाठ्यक्रमस्य मुख्योद्देश्यं छात्रेभ्यः संस्कृतभाषायाः मूलसंरचनायाः ज्ञानप्रदानं वर्तते। छात्राः संस्कृते वाक्यनिर्माणनैपुण्यं प्राप्नुयुस्तादृशः प्रयासोऽत्र विधास्यते। संस्कृतव्याकरणस्य च परिचयो बहूदाहरणपद्धतिना कारयिष्यते येन छात्राः सारल्येन संस्कृतव्याकरणस्य ज्ञानं कर्तुं समर्थाः भविष्यन्ति। भवन्तोऽनेन पाठ्यक्रमेण संस्कृतव्याकरणस्य मूलविषयान् वर्णसन्धिसमासादीन् ज्ञातुं समर्थाः भविष्यन्ति। पाठ्यक्रमेऽस्मिन् संस्कृतमन्त्राणां श्लोकानां गद्यादीनाञ्च शुद्धवाचनस्याभ्यासो कारयिष्यते। संस्कृतभाषायाः व्यावहारिकज्ञानं प्रदास्यते येन छात्राः पत्रलेखने, समाचारलेखने, समाचारवाचने च समर्थाः भविष्यन्ति। संस्कृतभाषायां विद्यमानस्य नीतिसाहित्यस्य संस्कृतेः विज्ञानस्य सामाजिकविषयाणां च ज्ञानं पाठ्यक्रमेऽस्मिन् कारयिष्यते।

**पाठ्यक्रमोद्देश्यानि** –

पाठ्यक्रममिमधीत्य छात्राः -

- संस्कृतभाषायाः मूलसंरचनां ज्ञातुं समर्थाः भविष्यन्ति।
- संस्कृतव्याकरणस्य मूलविषयाणां वर्णसन्धिसमासकारकादीनां ज्ञानमवाप्य वाक्यनिर्माणे नैपुण्यं प्राप्स्यन्ति।
- संस्कृतभाषायाः शुद्धोच्चारणे सामर्थ्यवन्तो भविष्यन्ति।
- संस्कृतभाषायाः व्यावहारिकज्ञानं विज्ञाय पत्रलेखने, समाचारलेखने, समाचारवाचने च समर्थाः भविष्यन्ति।
- संस्कृतभाषायां निहितस्य विज्ञानस्य संस्कृतेः सामाजिकविषयाणां च ज्ञानमवाप्य ज्ञानवृद्धिं कर्तुं समर्थाः भविष्यन्ति।